# Shri Tripurari Stotram

# શ્રીત્રિપુરારિસ્તોત્રમ્

## Document Information

Text title : Shri Tripurari Stotram

File name : tripurAristotram.itx

Category : vishhnu, stotra

Location : doc_vishhnu

Proofread by : Manish Gavkar

Latest update : September 24, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 24, 2023

*sanskritdocuments.org*

Shri Tripurari Stotram

# શ્રીત્રિપુરારિસ્તોત્રમ્

નમામોઽસુરારેસ્સુરારેર્ગણાગ્ર્યં
    નમામોઽન્ધકારિં મખારિં નિજારેઃ (રિમ્) ।
શિરો ગાઙ્ગવારિપ્રચારક્ષમોઽસ્ય
    નમામઃ પુરારિમ્ મુરારેઃ પ્રિયં તમ્ ॥ ૧॥

મુખૈઃ પઞ્ચભિઃ પઞ્ચભિઃ પઞ્ચષષ્ઠં
    ત્રયીસાઙ્ખ્યયોગાઙ્ગમારણ્યકાનિ ।
જગૌ ભક્તિકાણ્ડં હરેસ્સૌખ્યભાણ્ડં
    નમામઃ પુરારિં મુરારેઃ પ્રિયં તમ્ ॥ ૨॥

હરેરઙ્ઘ્રિતો ગાઙ્ગવારિ પ્રસૂતં
    કપર્દે કપર્દે કપર્દીચકાર ।
અખર્વં ચ ગર્વં હરન્ જહ્નુજાયા
    નમામઃ પુરારિં મુરારેઃ પ્રિયં તમ્ ॥ ૩॥

ગુરૂણાં ગુરુર્યો મતો નારદેન
    ઉપજ્ઞોઽપિ શિષ્યઃ પરઃ પૂરુષસ્ય ।
તૃતીયં ગુણં યો નિયન્તું નિયન્તા ।
     નામઃ પુરારિં મુરારેઃ પ્રિયં તમ્ ॥ ૪॥

સમસ્તાગમા મૂલમન્ત્રાશ્ચ સર્વે
    યતઃ સમ્પ્રસૂતા યતઃ સિદ્ધિમન્ત્રાઃ ।
પુરાણાર્ણમાદ્યં દશાર્ણં જપન્તે
    નમામઃ પુરારિં મુરારેઃ પ્રિયં તમ્ ॥ ૫॥

સદામ્નાયમાદ્યં જગૌ નારદાય
    વિકુણ્ઠાધિનાથાદવાપ્યૈવ પૂર્વમ્ ।
તતઃ શેષતઃ શેષધર્મં દધાર
    નમામઃ પુરારિં મુરારેઃ પ્રિયં તમ્ ॥ ૬॥

કૃપાતો ગતો વ્યાપિવૈકુણ્ઠભાજાં
    સમીપે દદર્શ વ્રજેશં રસેશમ્ ।
તતોઽનુગૃહીતોઽખિલૈર્ભક્તિવર્યૈઃ
    નમામઃ પુરારિં મુરારેઃ પ્રિયં તમ્ ॥ ૭॥

સ્થિતો યો નિદેશાય સિંહાસને સ્વે
    મણિવ્રાતકીર્ણે મુનિવ્રાતમધ્યે ।
ઉપજ્ઞો ગુરુર્જ્ઞાનદાનાય લોકે
    નમામઃ પુરારિં મુરારેઃ પ્રિયં તમ્ ॥ ૮॥

વ્યાસેન કથિતં પુણ્યં ત્રિપુરારેર્મહાસ્તવમ્ ।
કીર્તયેચ્છૃણુયાદ્યસ્તુ સ મુરારેઃ પ્રિયો ભવેત્ ॥ ૯॥

(૨૯-૩૭)

ઇતિ શ્રીશાણ્ડિલ્યસંહિતાયાં પઞ્ચમે ભક્તિખણ્ડે ચતુર્થાંશે
    એકાદશોઽધ્યાયે શ્રીત્રિપુરારિસ્તોત્રં સમ્પૂર્ણમ્ ।
મુરારિસ્તોત્રમ્

Proofread by Manish Gavkar

*Shri Tripurari Stotram*

pdf was typeset on September 24, 2023

Please send corrections to *sanskrit@cheerful.com*